**आपिञ्जर** न० ईषत्पिञ्जरं प्रा०स० । १स्वर्णे राजनि० । २ईषत्पिञ्जरवर्णे पु० ३तद्वति त्रि० “आपिञ्जराबद्धरजःकणत्वात्” रघुः ।

**आपिशलि** पु० अपिशलस्य मुनेरपत्यम् इञ् । आदिशाब्दिके मुनिभेदे । “इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्राजयन्त्यष्टादिशाब्दिकाः” कवि क० “वा सुप्यापिशलेः” पाणिनिनोक्तेस्ततोऽस्य शाब्दिकत्वम् स्त्रियां क्रौड्या०ष्यञ् । आपिशल्या तस्यस्त्र्यपत्ये स्त्री । आपिशलिना प्रोक्तम् अण् । आपिशलम् । तदीये शास्त्रे न० ।

**आपी** त्रि० आ+प्याय–क्विप् पीभावः । १आपीने वृद्धिमति ।

**आपीड** पु० आ+पीड–अच् । १शिखामाल्ये, २शिरोभूषणे, “तस्मिन् कुलापीडनिभे विपीड़ितम्” रघुः । “विचित्रमुकुटापीड़ा विचित्रकवचध्वजाः” भा०व०प० १७२ अ० “बद्धापीड़ांश्चारुरूपांश्च यूनो व्यूढोरस्कांस्तालमात्रान् ददर्श” भा० आ०प० १८७अ० । ३वृत्तवहिर्निःसृतकाष्ठे च । ३आपीडकमात्रे त्रि० ।

**आपीडा** स्त्री आ+पीड–अ । सम्यक्पीड़ने “तत्र तूर्णं गलापीडं कुर्याच्चाप्यधूननम्” सुश्रु० गलस्यापीडा मर्द्दनं यत्रेति तदर्थः ।

**आपीडित** त्रि० आ+पीड–क्त । १निष्पीडिते २निर्मृष्टे ।

**आपीत** न० ईषत् पीतम् प्रा०त० । माक्षिके धातौ । २ईषत्पीतवर्णे पु० ३तद्वति त्रि० । ईषत् पानं कृतं यस्य तादृशे ४जलादौ त्रि० ।

**आपीन** न० आ+प्याय–क्त पीभावः तस्य नत्वम् । (मेड़) १गवादेः ऊधसि “आपीनभारोद्वहनप्रयत्नात्” रघुः २कूपे पु० । “आपीनमूधः आपीनोऽन्धुः” मुग्ध० । अन्योपसर्गपूर्व्वकत्वे तु संप्यानइत्येव आङ्पूर्वकस्यापि अन्धूधसो रेवार्थयोःपीभावो नान्यत्र ।

**आपूपिक** त्रि० अपूपः शिल्पमस्य ठक् । १अपूपपाचके अपूपे अपूपभक्षणे साधु गुड़ा०ठक् । २अपूपभक्षणसाधने गुड़ादौ । अपूपो भक्तिरस्य अचित्तत्वात् ठक् । ३अपूपभक्षणसेवके । अपूपःपण्यमस्य ठक् । ४अपूपविक्रेतरि । अपूपस्तद्भक्षणं शीलमस्य ठक् । ५अपूपभक्षशीले । अपूपस्तद्भक्षणं हितमस्य ठक् । ईहितत्वेन अपूपभक्षणकर्त्तरि । अपूपानां समूहः अचित्तत्वात् ठक् । ७अपूपसमूहे न० ।

**आपूप्य** पु० अपूपाय साधुः वा अ । अपूपसाधने चूर्णे त्रि० ।

**आपूर** पु० आपूर्य्यतेऽनेन आ+पूर–घञ् । जलादिप्रवाहे “खेदापूरोयुवतिसरितां व्याप गण्डस्थलानि” माघः भावे घञ् । २सम्यक्पूरणे ३ईषत्पूरणे ४अभिव्याप्तौ च ।

**आपूरण** न० आ+पूर–भावे ल्युट् । १“समन्तात्पूरणे आपूरयति ल्यु । २सम्यक्पूरणकर्त्तरि त्रि० ३नागभेदे पु० “कालिको मणिनागश्च नागश्चापूरणस्तथा” भा० आ०प० ३५ अ० । [ २अभिव्याप्ते च ।

**आपूरित** त्रि० आ+पूर–क्त । यस्यापूरणं कृतं १तस्मिन्

**आपूर्य्यमाण** त्रि० आ+पूर–कर्म्मणि शानच् । सम्यक् पूर्य्यमाणे २समन्तात्प्रसृते “आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्” गीता । आधारे शानच् । सूर्य्यकिरणैः पूर्य्यमाणचन्द्रस्याधारे पक्षे । “उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदान विवाहाः” आश्व०गृह्य० । “अर्च्चिषोऽहरह्न आपूर्य्यमाण पक्षम्” छा०उप० ।

**आपूष** आ+पूष–वृद्धौ करणे घञ् । रङ्गे (राङ्) धातुभेदे, तस्य पुष्टिसाधनत्वादिकमुक्तं भा० प्र० “रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि । खुरकं मिश्रकं चापि द्विविधं रङ्गमुच्यते । उत्तमं खुरकं प्रोक्तं मिश्रकं गर्हितं भवेत् । रङ्गं लघु सरं रूक्षमुष्णमेहकृमीनपि । निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् । सिंहो यथा हस्तिगणं निहन्ति तथैव वङ्गो ऽखिलमेहवर्गम् । देहस्य सौख्यम् प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्” ।

**आपृच्** त्रि० आ+पृच–क्विप् । संसर्गयुक्ते । “मित्रक्रुवोयच्छसान न गावः पृथिव्या आपृगमुया स यन्ते” ऋ०१०, ८९,१४ ।

**आपृच्छा** स्त्री आ+प्रच्छ–अङ् । १आलापे, २जिज्ञासायाम् ३आभाषणे गतागतकाले ४शुभप्रश्ने ५आनन्दने च ।

**आपृच्छ्य** त्रि०आ+प्रच्छ–वेदे नि०क्यप् । जिज्ञास्ये । “आपृच्छ्यं वरुणं वाज्यर्षति” सि०कौ०धृता श्रुतिः । आ+प्रच्छ–ल्यप् । २जिज्ञासित्वेत्यर्थे अव्य० ।

**आपेक्षिक** त्रि० अपेक्षात आगतः ठक् । अपेक्षया प्राप्ते “किन्तु मध्यत्वमापेक्षिकम्” सि०कौ० “अस्तमस्तु ते इत्यापेक्षिकमस्तत्वम्” छा०उ०भा० । स्त्रियां ङीप् ।

**आपोक्लिम** न० ज्योतिषोक्ते जन्मलग्नावधितृतीयषष्ठनवमद्वादशस्थानेषु । “तृतीयं षष्ठनवममन्त्यञ्चापोक्लिमं विदुः” ज्यो०त० । “आपोक्लिमे यदि खगाः स क्लिे-